वा एतानविभक्तदायादान् सपिण्डानाचक्षते विभक्तदायादान् सकुल्यानाचक्षते सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवति इति । अस्यार्थः । पित्रादिपिण्डत्रयेषु सपिण्डनेन भोक्तृत्वात् । पुत्रादिभिस्त्रिभिस्तत्पिण्डदानात् । यश्च जीवन् यस्य पिण्डदाता स मृतः सन् सपिण्डनेन तत्पिण्डभोक्ता एवं सति मध्यस्थितः पुरुषः पूर्व्वेषां जीवन् पिण्डदाता मृतः सन् तत्पिण्डभोक्ता परेषां जीवतां पिण्डसम्प्रदानमृत आसीन् मृतैश्च तैः सह दौहित्रादिदेयपिण्डभोक्ता । अतो येषामयं पिण्डदाता ये चास्य पिण्डभोक्तारस्तेऽविभक्तं पिण्डरूपं दायं अश्नन्तीति अविभक्तदायादाः सपिण्डा इति । इदञ्च सपिण्डत्वं सकुल्यत्वञ्च दायग्रहणार्थम् । अशौचाद्यर्थन्तु पिण्डलेपभुजामपि । लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ॥ इति प्रागुक्तमत्स्यपुराणात् वक्ष्यमाणकूर्म्मपुराणशङ्खलिखितवचनाच्च पिण्डे यथा परस्परं भोक्तृत्वं तथा लेपे तुल्यन्यायात् । हारलतायां कूर्म्मपुराणम् ।

“सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
लेपभाजश्चतुर्थाद्याः सापिण्ड्यं साप्तपौरुषम् ॥”

लेपभागिभ्यस्तूर्द्ध्वं यावज्जन्मनाम्नोर्वेदनं यावदमुकनाम्नोऽस्मात् पूर्व्वपुरुषादयं जातः इति विशेषः । अयमस्मत्कुले जात इति सामान्यतो वा स्मर्य्यते तावत् समानोदकत्वमिति हारलता ॥ अत्र परवचनेनैव सापिण्ड्यसिद्धौ पूर्व्ववचनपूर्व्वार्द्धं जीवत्पितृकत्वादिना अधिकपुरुषेषु पिण्डलेपसम्बन्धेऽपि सपिण्डतानिवृत्तिज्ञापनाय । सर्व्वदेशीयाचारोऽपि तथा । यथा श्राद्धविवेकेऽपि पार्व्वणश्राद्धानन्तरं नित्यश्राद्धविकल्प उक्तः । मार्कण्डेयपुराणम् ।

“नित्यक्रियां पितॄणान्तु केचिदिच्छन्ति सत्तमाः ।
न पितॄणां तथैवान्ये शेषं पूर्व्ववदाचरेत् ॥”

अत्र पूर्व्वार्द्धात् पितॄणां प्राप्तौ न पितॄनामित्यत्र पुनः पितॄणां ग्रहणं सनकादीनामप्युत्सर्गाभ्यनुज्ञानार्थं इति फलान्तरमुक्तम् । हरिशर्म्मणापि अन्यार्थं पुनर्व्वचनमिति लिखितम् । अथ यः खलु पिण्डान् दत्त्वैव मृतः परतश्चाप्राप्तपितृभावः स कथं सपिण्डः एकपिण्डदातृत्वभोक्तृत्वलक्षणसम्बन्धाभावादिति चेत् तद्योग्यतयेति ब्रूमः । योग्यताप्रयोजकञ्च सामान्यशास्त्रविषयत्वम् । ततश्च अत्यतिवृद्धप्रपितामहावधिकाधस्तनानां षण्णां पुंसां प्रत्येकापेक्षया सप्तानामेकगोत्राणां स्वावधिपरतनानां सप्तानाञ्च सापिण्ड्यं पिण्डलेपयोर्दातृत्वभोक्तृत्वसम्बन्धादिति । स्त्रीणान्तु भर्त्तृसापिण्ड्येन सापिण्ड्यम् । प्रत्तानां भर्त्तृसापिण्ड्यमिति वचनात् । नन्वेवं कन्यायाः कथंसपिण्डतेति चेत् आदिपुराणवचनात् त्रैपुरुषं सापिण्ड्यम् । यथा,—

“सपिण्डता तु कन्यानां सवर्णानां त्रिपौरुषी ।”

अत्र कन्यानामनूढानाम् । अप्रत्तानां त्रिपौरुषमिति वशिष्ठवचनात् । तेन आत्मपञ्चमे वृद्धप्रपितामहे सापिण्ड्यं निवर्त्तत इति प्रतिपादितम् । अतएव कन्यायाः प्रपितामहभ्रात्रा तत्सन्ततिभिश्च सह सापिण्ड्याभावात् कन्यामरणजननयोस्तेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति । एवं तेषामपि जननमरणयोः कन्यानामिति शूलपाणिमहामहोपाध्यायाः ॥ यत्तु कूर्म्मपुराणम् ।

“अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम् ।
प्रत्तानां भर्त्तृसापिण्ड्यं प्राह देवः पितामहः ॥”

इति रत्नाकरधृतं तद्विवाहे पितृपक्षविषयम् । यथा, विष्णुपुराणम् ।

“सप्तमीं पितृपक्षाच्च मातृपक्षाच्च पञ्चमीम् ।
उद्वहेत द्विजो भार्य्यां न्यायेन विधिना नृप ॥”

सप्तमीं पञ्चमीं हित्वा इति शेषः । भर्त्तृसापिण्ड्यमित्यत्र साप्तपौरुषमित्यनुषज्यते । तेन भर्त्तृसमानसापिण्ड्यमित्यर्थः । शङ्खलिखितौ ।

“सपिण्डता तु सर्व्वेषां गोत्रतः साप्तपौरुषी ।
पिण्डश्चोदकदानञ्च शौचाशौचं तदानुगम् ॥”

गोत्रतः गोत्रैक्ये तेन मातामहकुले कदाचित् षट्पुरुषपर्य्यन्तं पिण्डसम्बन्धेऽपि न सपिण्डता तान् सप्तपुरुषान् आ समन्तात्कारेण पिण्डादिकमनुगच्छतीति तदानुगम् । एतेन सपिण्डता एकशरीरावयवान्वयेन भवति । तथा, हि । पितुः शरीरावयवान्वयेन पित्रा सह एव पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात् । एवं मातृशरीरावयवान्वयेन मात्रादिभिरपि । एवं पत्या सह पत्न्या एकशरीरारम्भकतया सापिण्ड्यम् । तथा च गर्भोपनिषदि । एतत् षाट्कौषिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः त्वङ्मांसरुधिराणि मातृतश्चेति । तत्र तत्रावयवान्वयप्रतिपादनात् निर्व्वाप्य पिण्डान्वये तु सापिण्ड्ये भ्रातृपितृव्यादिसापिण्ड्यं न स्यात् । अतिप्रसङ्गस्तु समान्यतमत्वेन प्रयोगोपाधिना निरसनीयः । यद्येवं मातामहादीनामपि मरणे सपिण्डत्वेन दशाहाशौचं प्राप्नोति स्यादेतत् यदि मातामहानां मरणे त्रिरात्रं स्यादशौचकं इत्यादिविशेषवचनं न स्यात् । यत्र तु विशेषवचनं नास्ति तत्र दशाहमिति मिताक्षरारत्नाकरादिमतमपास्तम् । लेपभाज इत्यादिवाचनिकेऽर्थे सापिण्ड्ये एकशरीरावयवान्वयरूपस्वकपोलरचितार्थानवकाशात् । निर्व्वाप्यपिण्डसम्बन्धेन भ्रात्रादीनां सापिण्ड्यस्य मत्स्यपुराणबौधायनाभ्यां पूर्व्वमुक्तत्वात् । कामधेनुहारलताकल्पतरुपारिजातकारादिभिस्तथैव व्याख्यातत्वाच्च । रेतःशोणितपरिणामरूपत्वादपत्यशरीरस्य भवतु वा तथा । पत्या सह पत्न्या एकशरीरारम्भकतायाः प्रत्यक्षबाधितत्वात् कथं सापिण्ड्यं प्रमातामहादीनां विशेषवचनाभावात् सपिण्डत्वेन दशाहाद्यशौचप्रसङ्गात् मातामहादौ सापिण्ड्यस्य लोकविरुद्धत्वाच्च । भवतु वा तथा शरीरद्वारा सापिण्ड्यं तथापि वचनात् यथा सप्तान्तर्गतत्वं तन्त्रं तथा गोत्रतः साप्तपौरुषीति वचनात् गोत्रैक्यमपि प्रागुक्तवचनात् । कन्यास्त्रिपौरुषं सापिण्ड्यं ऊढायाश्च भर्त्तृसापिण्ड्येन सापिण्ड्यमिति चेत् तदेतन्मतेऽपि व्यवस्थायां न क्षतिरिति । अतएव सुमन्तुवचनाभिहितं यत्सप्तमपुरुषपर्य्यन्तमशौचं तत्सप्तमपुरुषानन्तराशौचान्न्यूनं त्रिरात्रम् । यथा ब्राह्मणानामेकपिण्डस्वधानामादशमात् धर्म्मविच्छित्तिर्भवति आसप्तमात् त्र्यर्थविच्छित्तिर्भवति आतृतीयात् स्वधाविच्छित्तिर्भवति अन्यथा पिण्डाशौचक्रियाद्युच्छेदात् ब्रह्मतुल्यो भवतीति । अस्यार्थः । एका समाना पिण्डस्वधा येषां ते तथा । यथा एकोद्दिष्टस्य पिण्डे तु अनुशब्दो न युज्यते इत्यत्रानुशब्देनानुशब्दयुक्तो मन्त्रो लक्ष्यते अनुयुक्तमन्त्रस्तु ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति तथा पिण्डस्वधाशब्देन पिण्डसम्बन्धिस्वधाशब्दयुक्तमन्त्रकरणकदेयजलं लक्षितम् । तथा च । ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्तर्पयत मे पितॄन् इत्यनेन पिण्डान् सिञ्चेदित्युक्तम् । ततश्च एकपिण्डस्वधानां समानोदकानामित्यर्थः । अतएव मनुः ।

“जन्मन्येकोदकानान्तु त्रिरात्रात् शुद्धिरिष्यते ।”

विष्णुपुराणम् ।

“मातृपक्षस्य पिण्डेन सम्बद्धा ये जलेन वा ।”

मातृपक्षस्य मातामहपक्षस्य पिण्डेन सम्बद्धाः सपिण्डाः जलेन सम्बद्धाः समानोदका इति श्राद्धविवेकेऽपि व्याख्यातम् ।

“असम्बन्धा भवेद्यातु पिण्डेनैवोदकेन वा ॥”

इति विवाहेऽप्युक्तम् । अत्र पुत्रिकायाः पार्व्वणे पिण्डोदकयोः सम्बन्धात्कन्याभावेऽपि तद्योग्यतायाः सत्त्वात् कन्या पिण्डोदकसम्बन्धोच्यते । एतदनुसारादपि तस्याः सपिण्डता बोद्धव्या तस्मादेकपिण्डस्वधानामित्यनेन समानोदकभावः समाख्यातः । न तु दशमपुरुषपर्य्यन्तं पित्रादिजीवनादिना पिण्डसम्बन्धेऽपि सापिण्ड्यं विहितं प्रागुक्तयुक्तेः स्वधेत्यस्य तदनुपयुक्तत्वेन वैयर्थ्यापत्तेः । अपुत्रधनाधिकारस्तु सन्निहिततराभावे सप्तमपुरुषपर्य्यन्तम् । मृतपितृकस्य स्वधोपलक्षितश्राद्धाधिकारः पुरुषत्रयपर्य्यन्तमिति । अत्र स्वधाशब्दो मन्त्रपरः पितृभक्षपरोऽपि । तथा च गुणविष्णुधृता श्रुतिः । स्वधा वै पितॄणामन्नमिति । दशमपुरुषानन्तरं समानोदकत्वेऽपि न त्रिरात्रं किन्तु पक्षिण्यादि । तथा हि । उदकक्रियामधिकृत्य पारस्करः । सर्व्वे ज्ञातयो भावयन्ति । आसप्तमाद्दशमाद्वा समानग्रामवासिन यावत् सम्बन्धमनुस्मरेयुर्व्वा इति । भावयन्ति निष्पादयन्ति । अत्र यावत् सम्बन्धमनुस्मरेयुरेककुलजाता वयमिति स्मरणं